International Journal of Multidisciplinary Research and Development 2015; 2(2): 123-126

International Journal of Multidisciplinary Research and Development

IJMRD 2015; 2(2): 123-126
www.allsubjectjournal.com
Received: 11-01-2015
Accepted: 08-02-2015
E-ISSN: 2349-4182
P-ISSN: 2349-5979
Impact factor: 3.762

डॉ. छगन लाल शर्मा
नई देल्ही, भारत

**Correspondence:**
डॉ. छगन लाल शर्मा
नई देल्ही, भारत

# वैयाकरणभूषणसारकर्ता श्रीकौण्डभट्टः

**डॉ. छगन लाल शर्मा**

विदितचरमेव समैरपि यदखिलेऽपि विरिंचिप्रपंचे ब्रह्मणः सर्वश्रेष्ठा कृतिर्मानव इति। श्रेष्ठकृतेरूद्धारार्थं प्रददौ विधिः विविधज्ञानविज्ञानसमन्वितां संस्कृतेराधारभूतां कर्त्तव्याकर्त्तव्यावबोधिकां जीवनोन्नायिकां विश्वहितसम्पादिकां चतुर्वर्गावाप्तिसोपानस्वरूपांवेदराशिं लोकाय। एतादृशराशेरवबोधाय मानवजात्यै विद्यते व्याकरणशास्त्रस्य महत्यावश्यकतेति 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम' (महाभाष्यम्, प्रथमाह्निकम्, पृ. 4) इति महाभाष्यकारपतंल्युक्तया, 'प्रथमे हि विद्वांसो वैयाकरणाः व्याकरणमूलत्वात् सर्वविद्यानाम् (ध्वन्यालोकः 1/13) इति ध्वनिकारोक्त्या ज्ञायते। एतादृशे शब्दसाधुत्वप्रतिपादकेऽस्मिन् व्याकरणशास्त्रे प्रक्रियाग्रन्थाः आर्थिकग्रन्थाः इति द्वैविध्यं दृश्यते ग्रन्थानाम्। वैयाकरणभूषणसारस्य आर्थिकग्रन्थत्वेन प्रसिद्धिः। अस्य च ग्रन्थस्य।

वैयाकरणभूषणसारस्य कर्ता कोण्डभट्टः इति। अद्वैतशास्त्रव्यवस्थापने लब्धप्रतिष्ठस्य रङ्गोजिभट्टस्य पुत्रः, भट्टोजिदीक्षितस्य भ्रातृव्यः शिष्यश्च कौण्डभट्टः पदवाक्यप्रमाणपारावारीणः व्याकरणशास्त्रीयार्थिकग्रन्थकर्तृषु मुख्यं स्थानम् अलङ्करोति। यतो हि अयम् आन्ध्रदेशीयः ततोऽस्य नाम कोण्डभट्ट इति स्यात्। अस्य पितामहस्य अग्रजः 'कोण्डभट्टारकः' इति ख्यातः आसीत्। किं च पदार्थदीपिकायाः अन्ते भूषणारम्भे च कोण्डभट्ट (पदार्थदीपिकायाः अन्ते कोण्डभट्टेन निर्मिता 'कोण्डभट्टकृता' इति। भूषणारम्भे पंचमे श्लोके 'श्री कोण्डभट्टः कुर्वेऽहं वैयाकरणभूषणम्' इति।) इत्येव नाम उल्लिखितम् अस्ति। आन्ध्रभाषायां 'कोण्ड' इति पदस्य 'पर्वतः' इत्यर्थः। 'कोण्डय्य' कोण्डलराव, 'कोण्डारेड्डि' इत्येवं नामानि इदानीमपि आन्ध्रप्रदेशे प्रसिद्धानि (P.K. Gode: The Chronology of the works of kondabhatta P.207.211. Studies in Indian literary history vol. III, 1956)। अयं च कोण्डभट्टः केलदिभूपस्य वेङ्कटाद्रेः पौत्रस्य वीरभद्रस्य (क्री. श. 1629–1645) आस्थाने आसीत्। अयं तस्य भूपस्य प्रेरणया तर्कप्रदीपनामकं तर्कग्रन्थमरचयत्। अनेन कृताः ग्रन्थाः श्री. पि. के. गोडेमहोदयैः स्वीये लेखे एवम् उल्लिखिताः–

1. तर्कप्रदीपः – वीरभद्रप्रेरणया लिखितः भ्ंसस P. 79 Ben. 165
2. तर्करत्नम् – भ्ंसस P. 78
3. न्याय – पदार्थदीपिका – वाराणस्यां प्रकाशिता–क्री.श. 1900
4. वैयाकरणसिद्धान्तभूषणम् – वाराणस्यां प्रकाशिता–क्री.श. 1900
5. वैयाकरणभूषणसारः – बहुभिर्व्याख्यानैः बहुवारं मुद्रापितः।
6. लघुवैयाकरणभूषणसारः – च्चमतज 5399
7. वैयाकरणसिद्धान्तदीपिका – K. 88
8. स्फोटवादः – Peters I-121.

तत्रैव तैः प्रतिपादितं यत् कौण्डभट्टः पदार्थदीपिकायां वैयाकरणसिद्धान्त– भूषणम्, तर्करत्नं च समुल्लिलेख। अतश्च भूषणरचना वा, तर्करचना वा प्रथमा स्यात्। वाराणस्याः सरस्वतीभवनग्रन्थालये वैयाकरणसिद्धान्तभूषणसारस्यैको हस्तलेखो (सरस्वतीभवनसूचीपत्रे – क्रमसंख्या 39559 वै.भू.सारः लिपिकालः सं. 1695) दृश्यते यस्य कालः क्री.श. 1637 इत्युल्लिखितः। अतश्च अस्मात् कालात् पूर्वमेव भूषणसारः कृतश्चेत् भूषणरचना ततोऽपि पूर्वा भवितुमर्हति। गुरूप्रसादशास्त्रिभिः स्वसम्पादितभूषणसारारम्भे भूषणसारलेखनकालः 1662 विक्रमाब्दः (क्री.श. 1602) निर्दिष्टः इति संस्कृतव्याकरणशास्त्रेतिहासे युधिष्ठिरमीमांसकाः (सं.व्या.शा.इ. द्वितीयभागः पृ. 563)। प्रायोऽयं कालः भूषणस्य स्यान्न तु भूषणसारस्य। पदार्थदीपिकायां भूषणसारस्यानुल्लेखात् भूषणसाररचना पदार्थदीपिकातः परैवेति कौण्डभट्टग्रन्थानां क्रमः इत्थं निर्देष्टु शक्यते–

1. वैयाकरणसिद्धान्तभूषणम्
2. तर्करत्नम्
3. पदार्थदीपिका
4. वैयाकरणसिद्धान्तभूषणसारः
5. लघुवैयाकरणसिद्धान्तभूषणसारः
6. तर्कप्रदीपः
7. वैयाकरणसिद्धान्तदीपिका
8. स्फोटवाद इति।

यद्यपि पी.के. गोडे महोदयः श्रीकौण्डभट्टस्य ग्रन्थरचनाकालं क्री.श. 1610–1660 इति मनुते। (P.K. Gode's article on kondabhatta-Indian literary history vol. 1956) किन्तु वैयाकरणकेसरिणः व्याकरणशास्त्रे कृतभूरिपरिश्रमाः मम गुरवः तत्र भवन्तः श्रीमन्तः महामहोपाध्यायाः रामकृष्णमाचार्याः कथयन्ति यत् – "मन्मते कौण्डभट्टस्य रचनाकालः ईस्वी 1600–1640" इति निर्देशो युक्तः इति। तस्मात् कौण्डभट्टस्य समयः क्री.श. 1470 तः 1640 ऊहितुं शक्यम्।

केचन कथयन्ति यत्– कौण्डभट्टस्य गुरूः शेषकृष्णपण्डितसूनुः वीरेश्वरः इति। भूषणसारे विद्यमानमिमं श्लोकं ते प्रमाणत्वेन दर्शयन्ति–

**अशेषफलदातारमपि सर्वेश्वरं गुरूम्।**
**श्रीमद्भूषणसारेण भूषये शेषभूषणम्।। इति।**

वस्तुतस्तु एष श्लोकः न गुरूस्तोत्रपरः। किन्तु इष्टदेवतास्तुतिपरः। दर्पणादिव्याख्यासु तथैव व्याख्याततत्वात्। यस्य शेषभूषणस्य ग्रन्थारम्भे स्तुति कृता तस्यैव कृतिसमर्पणस्य युक्तत्वात्। एतत्–तुल्यमङ्गलश्लोकः पदार्थदीपिकायाः आरम्भेऽपि द्रष्टुं शक्यते। (पदार्थदीपिकारम्भे – श्रीमत्सिद्धिकरं कान्तं रमोमारमणात्मकम्। दयासिन्धुं चिदानन्दं सितासितमुपास्महे।।) हरिदीक्षितेनापि (शब्दरत्नारम्भे – शेषविभूषणमीडे शेषाशेषार्थलाभाय। दातुं सकलमभीष्टं फलमीष्टे यत्कृपादृष्टिः।।) शब्दरत्नारम्भे एतादृशः एव श्लोकः कृतः। अतश्चायम् इष्टदेवतास्तुतिपरः। स चेष्टदेवो हरिहरनाथः। एतेनैते दीक्षितवंश्याः हरिहराद्वैतिनः इति ज्ञायते। एतादृशो हरिहराद्वैतवादो बहोः कालात्पूर्वमेव आन्ध्रप्रदेशे प्रसिद्धः। क्रीस्तुशतके त्रयोदशशतके नेल्लूरूमण्डलं पालयतो मनुमसिद्धेर्मन्त्री, भारतान्ध्रीकर्तृष्वेकः 'तिक्कन' महाकविः स्वीयं भारतं हरिहरनाथस्यैव समर्पितवान्। (भूषणसारसमीक्षा पृ. 26) यदा स्वप्नेऽयं स्वेष्टदैवं हरिहरनाथमपश्यत् तदा स तम् अपृच्छत् –

**किमस्थिमालां किमु कौस्तुभं वा,**
**परिष्क्रियायां बहुमन्यसे त्वम्।**
**किं कालकूटं किमु वा यशोदा–**
**स्तन्यं तव स्वादु वद प्रभो मे।।**

(आन्ध्रमहाभारतस्य उद्योगपर्वणि पीठिकापद्यानि।)

**श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम्।**
**स्फोटरूपं यतस्सर्वं जगदेतद् विवर्तते।।**

इति भूषणसारमङ्गलश्लोकोऽप्येतादृशः एव खलु। तस्मादयं कौण्डभट्टो जनकपितृव्ययोस्सविधे एव सर्वाः विद्याः जग्राह इति युक्तम्। प्रसिद्धं पितृव्यं परित्यज्य अन्यत्र विद्यास्वीकारे औचित्याभावात्। किं च मनोरमाकुचमर्दिनीवाक्यात् भट्टोजिदीक्षितस्य वीरेश्वरस्य तच्छिष्याणां च सौमनस्यं नासीत् इति अवगम्यते। अतः कोण्डभट्टस्य वीरेश्वरशिष्यत्वमूहितुमपि अशक्यम्। (भूषणसारसमीक्षा– पृ. 27) यतः अनेन व्याकरणं स्वपितृव्यादेवाधीतम् अत एव तमपि भूषणेऽयमस्तौत्। तच्च भूषणारम्भे तृतीयः श्लोकः –

**वाग्देवी यस्य जिह्वाग्रे नरीनर्ति सदा मुदा।**
**भट्टोजिदीक्षितमहं पितृव्यं नौमि सिद्धये।।**


श्लोकोऽयं श्रीहरिरामशास्त्रिभिः भूषणसारव्याख्याग्रन्थे काशिकायामपि भूषणसाराङ्गत्वेन व्याख्यातो वर्तते।

### कौण्डभट्टस्य (कोण्डभट्टस्य) वंशः

कौण्डभट्टोऽयमासीत् आन्ध्रदेशीयः इत्यत्र न स्यात् कस्यापि विप्रतिपत्तिः "इष्टार्थकल्पवल्लरी" (इष्टार्थकल्पवल्लरीप्रस्तावः – त.स.म.डि.का. सं या–अपपप ग्रन्थसंख्या 4269) इति ग्रन्थे विशदतया प्रतिपादितत्वात्। विषयोऽयं 'भूषणसारसमीक्षा' इति मद्गुरूविरचितग्रन्थे स्पष्टतया विवृतो वर्तते। तदनुसारम् अत्र मया कौण्डभट्टप्रपितमहारभ्य यथाशक्ति प्रस्तूयते–
कौण्डभट्टस्य प्रपितामहः आसीत् यज्ञेश्वरः। अयं च वेदाध्यायी ब्राह्मणः आसीत्। अस्य चत्वारः पुत्राः आसन्। अस्य चतुर्षु पुत्रेषु द्वौ एव प्रसिद्धिम् अलभताम् स्ववैदुष्येण। ज्येष्ठः आसीत् कोण्डभट्टारकः तदनुजश्च लक्ष्मीधरः इति। कोण्डभट्टारकः पण्डितप्रकाण्डः आसीत्। अयं षड्दर्शनीतत्त्वविवेकग्रन्थम् अरचयत्। कोण्डभट्टारकः स्वानुजं लक्ष्मीधरं पाठितवान् आसीत्। लक्ष्मीधरः अपि मीमांसाद्वयपारगः सर्वविद्वत्कविसम्मतः आसीत्। अयं षड्भाषाचन्द्रिकाख्यं ग्रन्थं निर्ममे। (मुम्बय्यां के.पि. त्रिवेदिनाम् आमुखेन सह मुद्रिता – 1916) लक्ष्मीधरोऽयं विजयनगराधिपस्य अरवीडुवंशजातस्य तिरूमलरायस्य (क्री.श. 1570–73) सभापण्डितः (प्रभामण्डलव्याख्या– त.स.म.ङि का संख्या ग्रन्थसंख्या 9553) आसीत्। एतेन अधोलिखिताः ग्रन्थाः अपि रचिताः –

1. अनर्घराघवस्य 'इष्टार्थकल्पवल्लरी' व्याख्या
2. गीतगोविन्दस्य श्रुतिरंजनी व्याख्या
3. जयदेवप्रसन्नराघवस्य 'अभीष्टार्थदायिनी' व्याख्या (इष्टार्थकल्पवल्लरी प्रस्तावः।)
4. नलवर्णनकाव्यम् इति।

अस्य इष्टदेवता तिरूमलश्रीनिवासः आसीत्। अस्य समयः क्र.श. 1500–1580 मध्ये इति उह्यते। (भूषणसारसमीक्षा – पृ. 12) लक्ष्मीधरस्य भट्टोजिदीक्षितः रङ्गोजीभट्टः इति द्वौ पुत्रौ आस्ताम्। रङ्गोजीभट्टस्य पुत्रः आसीत् वैयाकरणभूषणसारकारोऽयं कोण्डभट्टः। कोण्डभट्टस्य पिता रङ्गोजीभट्टः केवलाद्वैतवादी आसीत्। रङ्गोजीभट्टः व्याससूत्राणमुपरि एकां टीकाम् अपि लिखितवान् आसीत्। (भूषणसारसमीक्षा – पृ. 12) रङ्गोजीभट्टः तादृशं ग्रन्थं निर्ममे यत्र द्वैतसिद्धान्तस्य तेन खण्डनं कृतम् आसीदित्येतत् **कौण्डभट्टविरचितवैयाकरणभूषणपङ्क्त्या** ज्ञायते। सेत्थम्–
"यश्चक्रे मुनिवर्यसूत्रविवृतिं सिद्धान्तभङ्गं तथा माध्वानाम्" इति।
रङ्गोजीभट्टोऽयं माध्वप्रमुखाचार्य वडेरूयतिं पराजितवान् (वैयाकरणभूषणसारः – भैमीभाष्योपेतः सत्यव्रतशास्त्रिकृता भूमिका) इति।
"विद्याधीशवडेरूसंज्ञकयतिं श्रीमाध्वभट्टारकं जित्वा" इत्यनया पङ्क्त्या ज्ञायते। ( वैयाकरणभूषणसारः – भैमीभाष्योपेतः सत्यव्रतशास्त्रिकृता भूमिका ) श्रीकोण्डभट्टस्य वंशवृक्षः इत्थं दर्शयितुं शक्यते–




### कौण्डभट्टस्य (कोण्डभट्टस्य) ग्रन्थाः

कौण्डभट्टेन विरचितेषु ग्रन्थेषु त्रयः एव प्रकाशिताः समुपलभ्यन्ते। अन्येषां नाममात्रावशेषता वा हस्तलिखितमातृकारूपता वा स्यात्। कौण्डभट्टस्य प्रकाशितानां ग्रन्थानां संक्षिप्तः परिचयः अत्र प्रस्तूयते।

### पदार्थदीपिका

सामान्यदर्शनज्ञानाय बहूपकारकोऽयं ग्रन्थः। न्यायग्रन्थोऽयं तर्कसङ्ग्रह–सदृशः। परन्तु यथा **तर्कसङ्ग्रहः** अत्यन्तसंक्षिप्तः तथा तु नायम्। पदार्थादिविषये नैयायिकमतेन सह अन्य दार्शनिकमतान्यपि अत्र उपन्यस्तानि। तद्यथा– वायोरनुमानगम्येतेति नैयायिकमतमुपपाद्य, तस्य प्रत्यक्षत्वमेवेति मीमांसकमतमपि सम्यगस्मिन् प्रदर्शितम्। 'न्यायसिद्धान्तमुक्तावली' इति ग्रन्थस्य 'पदार्थदीपिका' इति ग्रन्थः सारग्रन्थः इव प्रतिभाति। प्रमाणादिविचारेऽपि भाट्टप्रभाकरतान्त्रिकादिमत– विचाराः प्रस्तुताः।
कौण्डभट्टविरचितेऽस्मिन् दीपिकाग्रन्थे तर्करत्नस्य वैयाकरणसिद्धान्तभूषण–सारस्य च उल्लेखः वारं वारं दृष्टुं शक्यते।

### वैयाकरणसिद्धान्तभूषणम्

वैयाकरणसिद्धान्तानां प्रदर्शनाय भट्टोजीदीक्षितेन कारिकामयः कश्चन ग्रन्थः विरचितः। अयं च ग्रन्थस्तेन शब्दकौस्तुभस्य रचनानन्तरमेव रचितः आसीत्। शब्दकौस्तुभे योऽर्थः निणीतः स एवात्र सङ्क्षेपेण कथ्यत इति प्रतिज्ञापि आदौ कृता। तत्कारिकाग्रन्थस्य व्याख्यारूपमिदं भूषणम्। कौण्डभट्टोऽयं भट्टोजीदीक्षितहृदये स्थितान् भावान् सम्यक् ज्ञातवान्, तदनन्तरं तान् वैयाकरणसिद्धान्तान् ग्रन्थेऽस्मिन् सम्यक्तया व्याख्यातवान् 'गौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान् सिद्धान्तान् उपपत्तिभिः प्रकटये, तेषां वचो दूषये' इति कौण्डभट्टेन प्रतिज्ञा कृता वर्तते। (भूषणारम्भे– 'पाणिन्यादिमुनीन्' इत्यादि चतुर्थः श्लोकः।) अनया प्रतिज्ञया कौण्डभट्टस्येतरशास्त्रज्ञेषु तेषां सिद्धान्तेषु च द्वेषः अस्तीति न मन्तव्यम्। शास्त्रमूलभूतसिद्धान्तापरित्यागेन यावत्पर्यन्तं सर्वेषां शास्त्राणाम् ऐकमत्यमापादयितुं शक्यं तावत्पर्यन्तम् ऐकमत्यम् अनेन भूषणे प्रतिपादितम्। अत एवायं ग्रन्थः न केवलं वैयाकरणैः किन्तु अन्यशास्त्रज्ञैरपि शिरसि धार्यते। उक्तं च शाब्दतरङ्गिण्यां

(शाब्दतरिङ्गिणी, p 25, Sanskrit education society, Madras, 1969) श्रीमद्भिः सुब्रह्मण्यशास्त्रिभिः 'नव्यवैयाकरणसिद्धान्तानपेक्ष्य प्राचीनवैयाकरणसिद्धान्ताः नैयायिकसिद्धान्तसन्निकृष्टाः वर्तन्ते।' तत्रैव केचन उदाहरणतया प्रदर्शिताः। धात्वर्थः फलं व्यापरश्च, क्रियाजन्यफलाश्रयत्वं सखण्डमेव कर्मत्वम्, सर्वासां विभक्तीनां धर्मबोधकत्वम्, सङ्ख्याकारकयोः प्रत्ययवाच्यत्वम्, लिङर्थः प्रेरणा अभावार्थकत्वं नञः इत्यादि।

एवं 'सुब्विभक्तौ न लक्षणेति' सुब्विभक्तौ लक्षणां निराकृत्य साध्यत्वं द्वितीयार्थ इति मीमांसकमतं छन्दसि व्यत्ययाद्यनुशासनमाधारीकृत्य (वैयाकरणसिद्धान्तभूषणम्– सुबर्थनिर्णयः पृ. 244–45) समर्थितम्। एवं द्वितीयादीनां विषयत्वादिषु लक्षणां तिरस्कुर्वन् तत्र विषयत्वं फलरूपेणाभ्युपगम्य (वै.सि.भू. पृ. 126/127) आश्रयत्वादिकमेव द्वितीयार्थ इति पक्षेऽपि नैयायिकसम्मतः शाब्दबोधः समर्थितः। किं चात्र कौण्डभट्टेन नव्यमार्गबीजावापोऽपि कृतः। अभेदैकत्वसंख्यानिर्णये प्राचीनं मतद्वयम् उपपाद्य अन्ते नव्यमतम् इत्थं स प्राचीकटत् – 'नव्यास्तु (वैयाकरणसिद्धान्तभूषणम् – अभेदैकत्वसङ् ख्यानिर्णयः पृ. 286) पदार्थैकदेशत्वात् 'राजपुरूषः' इत्यत्र राज्ञस्तत्र सङ्ख्यात्वरूपेणापि न तदन्वयः इत्याहुः इति। अत्राहुरित्येनेन अरूचिरेव ग्रन्थकर्तुस्सूचितेति केचिन्मन्येरन्। परन्तु नव्यमते एवेष्टतां स इत्थं तत्रैव प्राकाशयत्–

'समासादौ शक्तिः कल्प्यमाना सङ्ख्याविशिष्टे एव सा कल्प्या इत्यभ्युपगमे तु नायं दोषः। परन्तु अनुभवविराहत् जिज्ञासानुरोधेन शक्तौ तु ज्ञानेच्छयोः समानप्रकारत्वेन हेतुहेतुमद्भावात् विशिष्यैव वाच्यतापत्तेः। इष्टापत्तौ जिज्ञासोच्छेदापत्तेः मूलोच्छेदात् शक्तिकल्पनमेव अनर्थकमिति विभावयाम इति दिक्' इति। वैयाकरणसिद्धान्तदीपिकेति कश्चन ग्रन्थः स्वतन्त्रो यदि एतत्कृत उपलभ्येत तर्हि कौण्डभट्टः नव्यमार्गप्रतिष्ठापको वा न वेति ज्ञातुं पार्येत।

यतो हि अयं वैयाकरणभूषणग्रन्थो भट्टोजीदीक्षितकारिकाग्रन्थस्य व्याख्यारूपस्तस्मात् भट्टोजीदीक्षिताशय एव शब्दकौस्तुभाद्युक्तः परिष्कृत्यात्र प्रकाशितः। उदहारणार्थम् – तद्विश्लेषजनकतत्क्रियानाश्रयत्वे सति विभागाश्रयत्वम् इति लक्षणं न दीक्षितेन कण्ठत उक्तम्। तथैवान्ये च विषयाः सूक्ष्मतया शब्दकौस्तुभे निर्दिष्टाः अस्मिन् विशदीकृताः। धात्वर्थनिर्णयादिषु प्रकृतनैयायिकमीमांसकादिमतवर्णनम्, तत्खण्डनम् चास्य सर्वतन्त्रस्वातन्त्र्यं प्रकटयति। तथैव 'कर्मकर्तृव्यपदेशाच्च' (व्या.सू. 1.2.4) इत्यादि सूत्रार्थनिर्णयादिषु तस्य वेदान्तशास्त्रज्ञता स्फुटा भवति। अयं च भूषणाग्रन्थः क्री.श.1900 वर्षे वाराणस्यां वाराणसीसंस्कृतपुस्तकमालायां प्रकाशितः इति।

**वैयाकरणसिद्धान्तभूषणसारः –**

वैयाकरणभूषणनिर्माणसमये एकस्यैव ग्रन्थस्य रूपत्रयनिर्माणस्य रीतिः प्रचलमाना आसीत्। अतः एव कौण्डभट्टेन वैयाकरणभूषणस्य रूपत्रयं निर्मितम् – वैयाकरणसिद्धान्तभूषणम्, वैयाकरणसिद्धान्त– भूषणसारः, लघुवैयाकरणसिद्धान्तभूषणसारः चेति।

अयं च 'वैयाकरणसिद्धान्तभूषणसारः' भूषणस्य सारग्रन्थः। अयं ग्रन्थः वैयाकरणसिद्धान्तभूषणग्रन्थापेक्षया लघुभूतः इत्यतः पठनपाठनेषु अस्यैव प्रचारो महान् आसीत्। विषयस्य निर्दुष्टता आवश्यकविषयसङ्ग्रहः संक्षेपश्चात्र कारणानि। अत एवास्य भूषणसारस्य बहवः टीकाः अपि कालक्रमेण सम्भूताः। 'नव्यव्याकरणग्रन्थानाम् प्रचारानन्तरम् अपि अस्य वैयाकरणभूषणसारस्य अनेकैः विद्वद्भिः व्याख्याः कृताः इति एतेनैव अस्य ग्रन्थस्य महत्त्वं ज्ञातु शक्यते। अस्मिन् ग्रन्थरत्ने चतुर्दशप्रकरणानि सन्ति।

| | |
|---|---|
| 1. धात्वर्थनिर्णयः | 8. निपातार्थनिर्णयः |
| 2. लकारार्थनिर्णयः | 9. त्वादिभावप्रत्ययार्थनिर्णयः |
| 3. सुबर्थनिर्णयः | 10. देवताप्रत्ययार्थनिर्णयः |
| 4. नामार्थनिर्णयः | 11. अभेदैकत्वसंख्यानिर्णयः |
| 5. समासशक्तिनिर्णयः | 12. सङ्ख्याविवक्षनिर्णयः |
| 6. शक्तिनिर्णयः | 13. क्त्वाद्यर्थनिर्णयः |
| 7. नञर्थनिर्णयः | 14. स्फोटनिर्णयः |

अस्य भूषणसारस्य व्याख्यासु श्रीदुर्बलाचार्यापरनामधेयकृष्णमित्रर– चिताल्पा व्याख्या रत्नप्रभानाम्नी, श्रीभैरवमिश्रविरचिता परीक्षा, श्रीहरिवल्लभभट्टाचार्यकृता दर्पणव्याख्या, श्री कालोपनामकहरिरामहोदयैः विरचिता काशिका च प्राचीनाः मुद्रिताश्च। गोपालदेवकृता कान्तिः अप्रकाशिता।

अर्वाचीनव्याख्यासु श्रीगोपालशास्त्रि 'नेने' कृता सरला, श्रीरामप्रसादत्रिपाठीकृता सुबोधिनी, श्रीबालकृष्णशास्त्रिपंचोलिकृता प्रभा, श्रीमारूलकरोपाह्वशङ्करशास्त्रिप्रणीता शाङ्करी, श्रीपेरि सूर्यनारायणशास्त्रिकृता तत्त्वदर्शिनी च प्रकाशिताः। तथा हिन्द्यादिभाषासु अनुवादाः तत्तद्भाषासु व्याख्याः अपि अस्य ग्रन्थस्योपलभ्यन्ते।

कौण्डभट्टस्य अन्ये ग्रन्थाः इदानीं नोपलभ्यन्ते। 'वैयाकरणसिद्धान्तदीपिका' इति ग्रन्थविषयेऽपि संशयः। परन्तु न्यू कैटलागस कैटलागोरम् (New catalogus catalogurum – Vol. V P. 92) मध्येऽपि ग्रन्थोऽयं तदीयत्वेन निर्दिष्टः। इतोऽपि ग्रन्थद्वयं N.C.C. (N.C.C. – V 92) मध्ये निर्दिष्टम्।

1. भाट्टमतप्रदीपः
2. प्रौढमनःप्रमोदजननम्।

एतयोः भाट्टमतप्रदीपः वाराणसेयसरस्वतीभवनग्रन्थालये (Saraswati bhavan. Benaras. Des. Cat. Vol. VII – No. 29654) कोण्डदेव– कर्तृकत्वेनोल्लिखितोऽस्ति। स च कोण्डदेवः, कोण्डभट्टश्चाभिन्नौ इति मत्या अयमपि ग्रन्थस्तदीयत्वेन उल्लिखितः। 'प्रौढमनःप्रमोदजननम्' इत्यस्ति न्यायग्रन्थः। केरल प्रदेशस्य त्रिवान्कूरूविद्यालयतालपत्रग्रन्थालयेऽयं ग्रन्थो विद्यत इति। (N.C.C. Vol V P 92 Ny. Traw Uni 5295 (inc) ) किन्तु सम्पूर्णतया नोपलभ्यते।

**कौण्डभट्टसमकालिकाः विद्वांसः**

**जगदीशः**

शब्दशक्तिप्रकाशिकाकारः जगदीशः नैयायिकेषु सुमहत्स्थानम् अलङ्करोति। 'शब्दशक्तिप्रकाशिका' इति ग्रन्थस्य रचना जगदीशेन क्री.श. 1635 तमे वर्षे कृता। (श. श. प्र. उपो., पृ. 3) जगदीश–कौण्डभट्टयोः ग्रन्थद्वयेऽपि तात्कालिकपण्डितसङ्घे परिदृश्यमानः समन्वयदृष्टिकोणः ऐकमत्यं च द्रष्टुं शक्यते। तदित्थम् –

i. परसमवेतत्वस्य द्वितीयावाच्यत्वम् उभयोरपि नेष्टम्।
ii. तस्य कर्मलक्षणघटकतापि नेष्टा।

'चैत्रश्चैत्रं गच्छति' इति प्रयोगस्तु द्वितीयार्थसंयोगे प्रकृत्यर्थस्य स्वप्रतियोगिकत्वसम्बन्धेनैव साकाङ्क्षतया द्वितीयान्तलभ्यस्य चैत्रीयत्वविशिष्टसंयोगस्य जनकत्वस्वाश्रयवृत्तित्वोभयसम्बनधेनैव क्रियायामन्वयेन चैत्रप्रतियोगिकसंयोगाश्रयवृत्तिगतेश्चैत्रे बाधाद्वारितः। (श. श. प्र. पृ. 320) परया कर्तृसंज्ञया कर्मसंज्ञायाः बाधान्न तादृशप्रयोगः इति कौण्डभट्टः। (वै. सि. भूषणम् पृ. 130) तत्र शाब्दबोधप्रसङ्गस्तु द्वितीयार्थफलप्रकारकबोधं प्रति तादृशव्यापारोपस्थितिर्हेतुरिति कार्यकारणभावेनैव वारयितुं शक्य इति तदाशयः।

**गागाभट्टः**

गागाभट्टोऽयं खण्डदेवस्य गुरूः आसीत् भाट्टमीमांसकधुरन्धरश्च। अयमपि कौण्डभट्टस्य समकालिकः। एषः "भाट्टचिन्तामणिः" इति ग्रन्थं रचयामास। अस्मिन् ग्रन्थे मीमांसकानां शाब्दबोधविचाराः विद्यन्ते। एते च विचाराः प्राचीनाः प्रायशः तात्कालिकन्यायव्याकरणसिद्धान्तसन्निकृष्टाः वर्तन्ते।

**खण्डदेवः**

पी.के. गोडे महोदयस्य "इण्डियन लिटरेरी हिष्ट्री– तृतीयः भागः" इति ग्रन्थात् 'खण्डदेवः क्रि.श. 1665 तमे वर्षे दिवङ्गतः' इति ज्ञायते। अतः अयम् अपि कौण्डभट्टसमकालिकः। एषः "भाट्टरहस्यम्" इति ग्रन्थं रचयांचक्रे। अत्र च खण्डदेवेन यत् वैयाकरणमतम् अनूदितं वर्तते तत् सर्वमपि भूषणोक्तमेव। गुरूशिष्ययोः (गागाभट्ट–खण्डदेवः) अस्ति कश्चन मतभेदः। अयं खण्डदेवः सर्वत्राखण्डोपाधिमङ्गीकुरूते। गागाभट्टस्तु सखण्डत्वमेव परिष्कुरूते।

**गदाधरः**

"व्युत्पत्तिवादः" इति ग्रन्थस्य कर्ता श्रीमान् गदाधरः कोण्डभट्टस्य समकालिकः एव। एतच्च "History of Navya Nyaya in Mithila" इति ग्रन्थस्य 197 तमे पृष्ठे "गदाधरः क्रि.श. 1709 वर्षे दिवङ्गतः" इति उल्लेखेन ज्ञायते। गदाधरः कोण्डभट्टस्य निर्णयेषु महान्तम् आदरं प्रादर्शयत्। तद्यथा – फलव्यापारयोरुभयोरपि धातुवाच्यत्वम्, सुब्विभक्तौ लक्षणाभावः इत्यादि सिद्धान्तास्तथैव गदाधरेण अङ्गीकृताः। गदाधराचार्येण व्युत्पत्तिवादे भूषणस्य तत्कर्तुः कोण्डभट्टस्य वा खण्डनं न कृतं वर्तते। सविषयकधातूनां विषयत्वादिकं धात्वर्थः एव, आश्रयत्वाधेयत्वादिकमेव तत्रापि द्वितीयार्थ इति कौण्डभट्टसम्मतस्सिद्धान्तो गदाधरेणापि स्वीकृतः इति व्युत्पत्तिवादे द्वितीयाविचारस्य सम्यक्तया परिशीलनेन ज्ञायते (भूषणसारतत्त्वप्रकाशिका, पृ. 21)। व्युत्पत्तिवादे प्रथमाकारकान्ते 'विभक्तौ लक्षणा न युक्ता' इति गदाधरेण कण्ठतः एवोक्तम्।

**अनन्तरेषु कौण्डभट्टस्य प्रभावः**

**गोकुलनाथः**

"पदवाक्यरत्नाकरः" इति ग्रन्थस्य कर्ता गोकुलनाथः। अस्मिन् ग्रन्थेऽयं वैयाकरणमतप्रदर्शनसमये सर्वमपि भूषणोक्तमेव लिलेख। एतेन कौण्डभट्टप्रभावितेषु गोकुलनाथः अग्रगण्यः इति वक्तुं शक्यते। वस्तुतः पदवाक्यरत्नाकरः भूषणसार– व्याख्येति वक्तव्यम्। यतः भूषणसारे भूषणे च सूक्ष्मतया उक्ताः वैयाकरणसिद्धान्त– प्रदर्शकयुक्तयः अस्मिन् पदवाक्यरत्नाकरे पूर्णतया विवृताः। यथा– अधिकरणत्वस्य आधेयत्वस्य वा द्वितीयार्थत्वं न सम्भवति, गौरवात् इत्युक्तं भूषणे। तस्मिन् पक्षे तत् उपपादकाः युक्तयः "अधिकरणत्वमाधेयत्वं वा न द्वितीयार्थः। तथा सति अधिकरणतात्वस्याधेयतात्वस्य वा शक्यतावच्छेदकत्वापत्त्या अतिगौरवात्। तच्चाधिकरणत्वम् आधेयत्वं वा निरूपकतासम्बन्धेन वाच्यम्। तथा च कालं पचतीति प्रयोगापत्तिः। विक्लित्तौ कालवृत्त्यधिकरणतानिरूपकत्वस्याबाधात्। तत्तद्धातुसमभिव्याहारे तत्तत्संसर्गावच्छिन्नानाम् अधिकरणत्वानाम् आधेयत्वानां वा तत्तद्धातुसव्यपेक्षद्वितीयाशक्यत्वमिति स्वीकारे नानाशक्तिकल्पनारूपगौरवं स्पष्टमेव" इत्यादिना पदवाक्यरत्नाकरे प्रतिपादिताः। अयं च पदवाक्यरत्नाकरग्रन्थः सर्वशास्त्रसिद्धान्तानाम् आकर इव भाति, तत्रापि न्याय–व्याकरण–मामांसाशास्त्र– सिद्धान्तानाम्। गोकुलनाथः पचादिधातूनां तत्तद्व्यापारेषु नानार्थताम् सविषयकधातूनां जानातीत्यादीनां विषयतारूपफलावाचकत्वं च कौण्डभट्टोक्तम् अङ्गीकृतवान्। उक्तं च शाब्दतरङ्गिण्याम् श्रीमद्भिः सुब्रह्मण्यशास्त्रिभिः विषयत्वं ज्ञानं च धात्वर्थः इत्युभ्युपगम्य घटादीनां जानाति– कर्मत्वमिति पदवाक्यरत्नाकरोक्तमिति। विषयोऽयं सर्वोऽपि "भूषणसारतत्त्वप्रकाशिका" इति ग्रन्थे आचार्यैः प्रोक्तो वर्तते।

**नागेशः**

कौण्डभट्टस्य प्रभावः नव्यवैयाकरणे नागेशे मजूषादिग्रन्थेषु तत्तन्मत–निराकरणसये द्रष्टुं शक्यते। नागेशेन निराकरणसमये कौण्डभट्टप्रदर्शिता एव युक्तयः प्रदर्शिताः। परमलघुमंजूषायां प्रायशः सर्वे सिद्धान्ताः भूषणसारीया एव। यतो हि नागेशे खण्डदेवप्रभावोऽपि अस्ति अतः तत्र तत्र वैमत्यमपि दृश्यते।

**गिरिधरः**

गिरिधरः गोकुलनाथस्य शिष्यः आसीत्। अनेन वैयाकरणसिद्धान्तप्रतिपादन– समये स्वविभक्त्यर्थनिर्णये भूषणकृन्मतम् एव उल्लिखितम्। जानाति इत्यादौ विषयत्वस्य फलत्वेन धात्वर्थत्वाङ्गीकारः अस्यापि सम्मत एव। एवम् अनेकेषु विषयेषु तयोः ऐकमत्यमपि अस्ति।
एवमेव कृष्णभट्टः यश्च वृत्तिदीपिकास्फोटचन्द्रिकादिग्रन्थानां कर्ता वर्तते तस्योपर्यपि कौण्डभट्टस्य प्रभावो द्रष्टुं शक्यत इत्येतेन कौण्डभट्टस्य महत्वं ज्ञायते।

**उपयुक्त–सन्दर्भ–ग्रन्थ–सूची**


1. भूषणसारतत्त्वप्रकाशिका – (भू. सा. तत्त्वप्रकाशिका) महामहोपाध्यायः आचार्यः के. वि. रामकृष्माचार्यः, राष्ट्रिय–संस्कृतविद्यापीठम्, तिरुपतिः 2010
2. भूषणसारसमीक्षा–आचार्यः के. वि. रामकृष्णमाचार्यः, राघवप्रकाशनम् तिरुपतिः 1996
3. नरसिंहप्रिया – वैयाकरणभूषणसाख्याख्या नामार्थनिर्णयान्ता – महामहोपाध्यायः आचार्य के. वि. रामकृष्णचार्यः, प्रकाशनाय सिद्धा।
4. वैयाकरणभूषणनिबन्धसंग्रहः– (वै. भू. नि. स.) चौखम्भा, 1939
5. वैयाकरणभूषणसारः– काशिकाव्याख्या (भू. सा. का.) मुम्बई, 1915
6. वैयाकरणभूषणसारः–दर्पणकाशिकायुतः (भू. सा. द. का.) मुम्बई, 1915
7. वैयाकरणभूषणसारः – दर्पणपरीक्षायुतः (वैः भू. द. प.) हरिदाससंस्कृतग्रन्थमाला 133, चौखम्भा. वाराणसी, 1939
8. वैयाकरणभूषणसारः–प्रभादर्पणयुतः (भू. सा. प्र. द.) आदर्शग्रन्थमाला 2, वाराणसी, 1967
9. वैयाकरणभूषणसारः–तत्त्वदर्शिनीव्याख्यायुतः (भू. सा. तत्त्व) विजयनगरम् (आ. प्र.), 1967
10. वैयाकरणभूषणसारः–शांकरी (भू. सा. शां.) आनन्दाश्रमसंस्कृत–ग्रन्थावलिः 135, पूना 1967
11. वैयाकरणभूषणसारः–सरलासुबोधिनीयुतः (भू. सा. स. सु.) हरि–कृष्णनिबन्धमणिमाला 7, वाराणसी, 1952
12. वैयाकरणभूषणसारः–भैमीभाष्योपेतः (भैमी) देहली, 1969
13. वैयाकरणभूषणसारः–कुमारीसुदेशगिरिव्याख्या, देहली, 1969
14. वैयाकरणसिद्धान्तभूषणम्–(वै. सि. भू.) काशीसंस्कृतग्रन्थमाला, 1900
15. संस्कृत व्याकरण शास्त्र का इतिहास, भागद्वयम् (सं. व्या. शा. इ.) युधिष्ठिर– मीमांसकः
16. सिद्धान्तकौमुदी तत्त्वबोधिन्या सह (सि. कौ. त.) निर्णयसागरप्रकाशनम्, मुम्बई, 1936
17. सिद्धान्तकौमुदी, बालमनोरमा तत्त्वबोधिनीयुता (सि. कौ. बा. त.) मोतीलाल बनारसी दास, देहली, 1964
18. New Catalogus Catalogurum, V
19. Trends in Linguistics – Panini- A survey of research, George Cardona, Paris, 1976